श्रीः

अर्थशास्त्रव्याख्या
चाणक्यटीका

भिक्षुप्रभमतिकृता ।

अध्यक्षप्रचारः—द्वितीयमधिकरणम्

T. 109; M. 45. एवं विनयोपदेशाद् राज्ञः कार्यानुष्ठानयोग्यता प्रतिपादिता । इदानीम् अमात्यादिभिः सह तेन कार्याण्यनुष्ठेयानि । तानि च स्वपरमण्डलाश्रयभेदाद् द्विविधानि । तत्र अन्तरङ्गत्वाद् अन्येषाञ्च कारणत्वात् स्वमण्डलाश्रितान्युच्यन्ते । तान्यपि योगक्षेमभेदाद् द्विविधानि । तत्र योगपूर्वकत्वात् क्षेमस्येति तदभिप्रायकोऽध्यक्षप्रचार उच्यते । स्वगतकार्यानुष्ठानेऽध्यक्षाः प्रचरन्त्यनेनोपदेशेनेति अध्यक्षप्रचारः इत्यधिकरणक्रमः । प्रकरणक्रमस्तु राजपुत्ररक्षणादीनि आत्मरक्षान्तर्भूतान्येव प्रकरणानि । तत्र चोक्तम् "रक्षितो राजा राज्यं रक्षति" इति । राज्यञ्च जनपदप्रधानमेव । तस्य च पुरुषवत्तया सामग्रयम् । यथा च वक्ष्यति—"पुरुषवद्धि राज्यम्" (अधि० ७, अध्या० ११.) इति । सर्वकर्मणाञ्च उत्तरप्रकरणभाविनां योनित्वात् । तस्मात् तन्निवेश आत्मरक्षानन्तरम् उच्यते । सूत्रसम्बन्धस्तु पृथिव्याद्ध्येय (?) इत्युक्तं पुरस्तात् । पूर्वप्रकरणापेक्षं हि......ना सूत्रम् , उत्तरप्रकरणानुरूपञ्च तदादिसूत्रम् । तयोः स्वप्रकरणे गुणीभूतयोः नापेक्षा । यथा वाक्यावयवानां पदानां वाक्यान्तरावयवानां प्रत्यनपेक्षा, वाक्यद्वयोर्वा अपेक्षा । कथम् अधिकरणावयवानां प्रकरणानां सम्बन्ध इति चेत् प्रकरणान्येव एकार्थानि, अधिकरणं तु अधिकरणमेव, न समुदायान्तरमित्यदोषः ॥

तत्र प्रकरणावताराय सूत्रमाह—भूतपूर्वमिति । भूतः पूर्वो भूतपूर्व इति । अयं शब्दो भवतेः सामान्यशब्दत्वात् शब्दान्तरापेक्षया विशेषं परिगृह्णाति । आढ्यो भूतपूर्व इति यथा । तदिह विशेषशब्दानुपादानात् केन विशेषेण भूतपूर्व इति । तत्र निवेशस्य विधीयमानतया सान्निध्यात् तदपेक्षया

निविष्टपूर्वमिति योज्यम् । जनपदशब्दोपात्तो विशेषः जनाः पद्यन्ते........ अनेन विशेषेण अयं शब्दो देशविशेषे प्रवृत्तः न कान्तारपर्वतादिषु । तेन जनपदत्वेनैव भूतपूर्वमपूर्वं भवति । (पर)देशापवाहनेनेति । देशस्था देशाः, तेषामपवाहनं वक्ष्यति—"सुखं वा सानुग्रहपरिहारसौकर्यं फललाभभूयस्त्वेन स्वकर्मणाम्" (अधि० ७, अध्या० १.) इत्यादिना । स्वदेशेनाभिस्यन्दसपत्न(?) धान्यपशुमनुष्याद्याधिक्यम् । शरीरस्येव श्लेष्मोद्रेको मा भूत् । अल्पाश्रयत्वाद-कर्मण्यत्वमिति । तस्य वमनेन अपकर्षणेन । तं प्रस्तारेण अव्यवस्थया वा न निवशयेत् । किन्तर्हि स्थानीयादिकल्पनया ॥

शूद्रकर्षकप्रायमिति । विष्टया सङ्घातेन चोपकारित्वात् । कुलशतेनावरं क्रोशसीमानम् । पञ्चभिः कुलशतैः परं प्रकृष्टं द्विक्रोशसीमानम् । अर्थाद् अध्यर्धक्रोशसीमानं मध्य(म)कुलशतस्य । दाम्पत्यमेकचुल्याधानत्वं एकगृहाधानत्वं वा क्षेत्रविभागं प्रत्यनङ्गभूतम् । तस्माद् एकद्वित्रिहलत्वेन कुलानां कुलत्वम् । चतुःषड्गवत्वेन च हलत्वमेवेष्यते । षड्गवतया च हलस्य मध्यमा प्रतिपत्तिः । तावता विभागेन कुलक्षेत्रयोः अन्योन्यप्राकाम्यं भवति । तथा चोक्तम्—

> "हलमष्टगवं धर्म्यं षड्गवं व्यावहारिकम् ।
> चतुर्गवं नृशंसानां द्विगवन्तु गवाशिनाम् ॥"

इति । तत्र क्रोशस्थितानि इतरेतरापेक्षया सीमानि यस्य स क्रोशसीमा । यथा पूर्वस्मात् क्रोशे पश्चिमम्, उत्तरस्मात् क्रोशे दक्षिणमिति । चतुर्धा च ग्रामोपभोगः क्षेत्रेण वास्तुना गोप्रचारतया देवतास्थानारामतटाकरथ्योद-पानादिभिश्च । धनुःसहस्रद्वयश्च क्रोशः, चतुर्हस्तश्च धनुः । तत्र क्षेत्रप्रतिबद्धत्वात् कुलानां ग्रामार्धं तावद् धनुःसहस्रं तिर्यग्धनुःसहस्रद्वयेन गुणितं कुलशतेन भिद्यमानं त्रिंशतिर्धनुःसहस्राणि प्रत्येकं कुलस्य क्षेत्रम् । एवं समुदायेन विंशतिर्धनुर्लक्षाणि कुलशतस्य क्षेत्रम् । ततोऽर्धं दशधनुः-सहस्राणि अविभागेन साधारणोपयोगित्वाद् देवस्थानादिषु प्रतिकुलं पर्याप्तानि समुदायेन दशधनुर्लक्षाणि । ततोऽप्यर्धे पञ्चधनुःसहस्राणि प्रतिकुलं पशुप्रचारभूमिः पर्याप्ता समुदायेन पञ्चधनुर्लक्षाणि । ततोऽप्यर्धं पञ्चधनुः-सहस्राणि प्रत्येकं वास्तुभूमिः इक्षुशाकापरसस्यगृहगोशालादिषु प्रभवति । समुदायेन पञ्चधनुर्लक्षाणि । एवं चत्वारिंशद् धनुर्लक्षाणि क्रोशसीम्नो

ग्रामस्य । द्विक्रोशसीम्नोऽपि चतुर्धनुःसहस्रेषु तिर्यग्धनुःसहस्रचतुष्कगुणितेषु दशधनुर्लक्षपरिमाणाः षोडशभागा भवन्ति । तत्र दश भागाः पञ्चानां कुलशतानां क्षेत्राणि । एको भागो देवस्थानादिषु । कुलप्रवृद्धावपि तावता चरितार्थत्वान्न वर्धते । तस्मात् साधारणोपभोग्यत्वाद् वृद्धिः प्रत्यन्तभूम्यधिके तु न निवार्यते । क्षेत्रादयस्त्वसाधारणोपभोग्यत्वान्नियम्यन्ते । शेषाः पञ्च भागाः प्रत्येकमर्धविभक्ता वास्तुगोभूमिषु पर्याप्ताः । एवमध्यर्धक्रोशसीम्न्यपि धनुःसहस्रत्रितयेन गुणिते दशधनुर्लक्षपरिमाणा नव भागा भवन्ति । तत्र पञ्च भागा अर्धत्रिकुलशतानां(?) क्षेत्राणि परिधि . . . . . . षु भागेषु अर्धत्रिकभागाः पुनः प्रत्येकमर्धविभक्ताः गोवास्तुभूमिप्रविभागार्थाः । शेषोऽध्यर्धभागः देवस्थानादिषु साधारणोपभोग्यो भवति । अत्र भूम्याधिक्यान्न निवार्यते वृद्धिः । यथोक्तम्—

"ग्रामादर्धं कुलक्षेत्रमर्धार्धं गोनिवासभूः ।
धनुःसहस्रमात्रं तु पुण्यस्थानाय शेषयेत् ॥

दश भागास्तथा क्षेत्रं पञ्च गोवास्तुभूमिषु ।
शेषभागेऽप्यथैकस्तु पुण्यस्थाने विधीयते ॥

पञ्चभागास्तृतीयेऽपि क्षेत्राण्यर्धत्रिका अपि ।
वास्तुगोभूमिषु क्षेत्रं शेषं शेषे प्रकल्पयेत् ॥"

इति । अनया च कल्पनया भूम्या विहितां(?) स्थापयेत्, मा भूत् सीमाविवाद इति ॥

M. 46. अष्टशतग्राम्या मध्य इति । चतुर्षु पार्श्वेषु द्वयोर्द्वयोः ग्रामशतयोरेव स्थानं मध्यं भवति । अनतिविप्रकृष्टत्वात् समुदयो व्यवहारो वात्र संग्रहीतुं शक्यते । समुदयस्य व्यवहाराणाञ्च स्थानाय हितत्वात् स्थानीयम् । द्रोणमुखमिव द्रोणमुखम् । चतुर्षु ग्रामशतेष्विव यः प्रत्ययः स तेन विच्छिन्नः स्थानीये प्रक्षिप्यत इति(?) T. 110. कार्पटिकमिति रूढम् । विषयव्यवहाराणां स्थानत्रय? । दशग्रामीसंग्रहेणेति । दश दश ग्रामान् संहृत्य महत्तरायत्तान् योगक्षेमदानकरप्रविचयार्थं कृत्वा अनेन प्रकारेण प्रस्थापयेत् ॥

अन्तेष्विति जनपदस्य । अन्तपालदुर्गाणि तेन रक्ष्यमाणत्वात् । जनपदद्वाराणीति । अपरिज्ञातानीति मन्यतो(?) निष्कासप्रवेशयोः प्रतिषेधार्थम् । अन्तपालाधिष्ठितानीति । तेन नित्यमविरहितत्वात् स्थिरीकरणार्थं पुनर्वचनम् । तेषामिति चतुर्णां स्थानीयादीनाम् अन्तरालानि पुलिन्दाः शबरविशेषा एव अत्यन्तं जनपदभाषाचारानभिज्ञाः अरण्यचराः मृगय्वादयः । रक्षेयुः यथा उन्मार्गेण कश्चिन्न सञ्चरति ॥

क्षेत्रकल्पनेदानीमुच्यते त्रिवर्गमूलत्वाद् धर्मस्य । तदर्थं तावता(?) ब्राह्मणेभ्यो दानार्हाणि धर्मार्थं वा दानार्हाणि । ब्रह्मदेयानि, क्षेत्राणीति वक्ष्यमाणापेक्षया । अदण्डकराणीति । क्षेत्रसम्बद्धेन राज्ञा दण्डकरौ न ग्राह्यौ । अभिरूपदायकानीति वृत्ताध्ययनतपःसम्पन्नाः तत्पुत्रपौत्रादयोऽपि स्वामिनो येषामिति । तानि तेभ्यो न पुनः राजदेयानीत्यर्थः । अध्यक्षाः समाहर्त्रादयः । संख्यायकाः गाणनिकाः । आदिशब्दात् लेखकरूपदर्शकादयः । दशकुली-चिन्तको गोपः। वक्ष्यति—"दशकुलीं गोपश्चिन्तयेत् (अधि. २, अध्या. ३९) इति । स्थानिकाः स्थानमुख्याः । अनीकस्थाः । हस्तिलक्षणविदः । हस्त्यश्वनराणां चिकित्सकाः । अश्वदमकाः स्वनामप्रतीताः । जङ्घाकारिकाः लेखहारकाः । तेभ्यो विक्रयाधानवर्जम् । ब्रह्मदेयानां विक्रयाधेयत्वात् ॥

T. 111; M. 47. कृतानि क्षेत्राणि प्रहतानि हलाद्युपहतानि । हलाद्यकृतानि खिलानि कर्तृभ्यः । करदेभ्य एव आधेयानीति वचनात् पुत्रेभ्योऽपि नेयम् ॥

अकृषतां करदानां कृतानि तद्भिन्नखिलानि वा आच्छिद्य अन्येभ्यः प्रयच्छेत् । पुनस्तेषामेवेदं भविष्यतीति उपेक्षया तदसंभवाद्वा नैतेऽपि कृषेयुः, तदा ग्रामभृतकाः नापितादयः वैदेहका वाणिजकाः कृषेयुः । अवहीनमिति । क्षेत्रं स्वीकृत्य अकृषन्तः यत् फला............ । धान्यादिभिरनुगृह्णीयात् । अशक्ता न कृषेयुः । सुखेनेति अपीडया उत्पन्नं स्तोकमित्यर्थः ॥

अनुग्रहः उक्तलक्षणः । परिहारः उचितस्यानादानम् । कालनियमेन त्रिवार्षिकः पाञ्चवार्षिको वा । कोशवृद्धिकराविति यदा मन्येत आभ्यां जनपदो सक्तः प्रभूतकृष्यादिकर्मतया धान्यपण्यहिरण्यैः कोशं मे वर्धयिष्यतीति तदाधा(?) । यदा वनभोजनाद्यासक्तस्तदा वर्जयेदित्यर्थः । प्राप्ते पुनर्वचनं प्रवृत्त-

पूर्वयोरपि प्रतिषेधार्थमाह—अल्पकोशो हीति । यथागतकं वेति । यावद् आयाताः प्रतिवसन्ति तस्य तदागमनाद्यपेक्षया दद्यात् । तत्र धर्मकालापेक्षया उक्तधर्माधर्मार्थं परिहारस्य । निवृत्तपरिहारानिति पूर्णपरिहारकालान् न परिहारानुशयात् पीडयेदित्यर्थः ॥

T. 112. विषयसन्निवेशम् अभिधाय इदानीम् आश्रयाणां व्यवस्थापनमाह—एत्य अस्मिन् कुर्वन्तीत्याकरः सुवर्णरूप्यताम्रादिप्रभवः । तत्र कर्मान्तान् वक्ष्यमाणविधानेन निवेशयेत् कोशार्थम् । द्रव्यवनं दार्वाद्युपलक्षणार्थम् । संरक्षणेन वानेन(?) । हस्तिवनं त्रासच्छेदप्रतिषेधेन । व्रजं वक्ष्यमाणलक्षणं दोहनप्रतिपालनाभ्याम् । वणिक्पथस्य प्रचरणं गतागताभ्यां क्रयविक्रयरक्षादिभिः । वारिपथपण्यानाम् उपनदमुपसमुद्रञ्च पत्तनानि विक्रयस्थानानि । स्थलपथपण्यानाञ्च हैमवतदाक्षिणात्यानां वणिक्पथमेव कृतव्यवस्थानं निवेशयेदिति ॥

सहोदकं तत्रैवोत्पन्नोदकम् । अन्यस्मादानीतोदकम् आहार्योदकम् । भूमिरुदकाधारस्य । मार्गं आहार्योदकस्य । उपकरणं शकटकुद्दालपट्टिकादि । पुण्यस्थानं सभाप्रपातटाकादि । आरामाः प्रयासफलार्थाः । तेषां भूम्यादिभिरेवानुग्रहः । अपक्रामत इति । सेतुबन्धात् संभूयानुक्त्वा कस्यचिदुत्तिष्ठतः कर्मकराः कर्मान्तरे नियुक्ताः, बलीवर्दाश्च बलादानीय कर्म कारयितव्या इत्यर्थः । व्ययकर्मणि चेति । व्ययेन यत्र खनकादीनां तत्र भागं वहेदित्यर्थः । न चांशमिति । कर्मकाले यदाज्ञापनाद्यनुग्रहः कृतः कर्मातिरिक्तं वा यदुपकरणम् । तस्य असन्निहितत्वान्न लभेत ॥

T. 113. प्लवाः पक्षिणः । हरितपण्यानि शाकादीनि । आहितकः स्वदासः अन्यस्वामिनः अर्थं गृहीत्वा य आहितः । अशृण्वतः स्वामिनां निविशताम् । विनयं ग्राहयेत् यथा स्वामिनां विधेयीभवति । बालः अप्राप्तव्यवहारः । व्यसनी दुःखाभिभूतः । अनाथः निस्स्वजनः । एते यदा शून्यनिवेशिताः विनाशीभवन्ति तदा एनान् बिभृयात् । अप्रजातामिति गर्भिणीम् अनाथामित्येव । प्रजातायाश्च पुत्रानिति न तावतैव सनाथा भवति ॥

M. 48. बालद्रव्यमिति । यदा बालोऽनाथः स्यात् । ग्रामवृद्धाः व्यवहारिणः । वर्धयेयुः कृष्यादिप्रयोगैः । आ व्यवहारप्रापणादिति ।

"द्वादशवर्षा स्त्री प्राप्तव्यवहारा । षोडशवर्षः पुमान्"(अधि० ३, अध्या० ३.) इति । यच्च ग्रामदेवताद्रव्यं निवेशसकाले दत्तं भूतपूर्वं वा तत् त एव वर्धयेयुः आ विनियोजनादित्यूह्यम् ॥

शक्तिमत इति कार्योपकरणसंपन्नस्य । पतितेभ्य इति महापातकयुक्तेभ्यः ।

"संवत्सरेण पतितः पतितेन समाचरन् ।"

इति दोषात् । माता तु पतितापि गर्भधारणाद्युपकारित्वाद् धर्मायैव भर्तव्या ॥

अप्रतिविधायेति । पुत्रानुत्पाद्य गुणवति पुत्रे कुटुम्बमाधाय शेषपुत्राणां निवेशनं प्रतिविधानम् । पूर्वः साहसदण्ड इति । वक्ष्यमाणः । T. 114. स्त्रियमिति आत्मीयाम् । लुप्तव्यायामः बाह्याभ्यन्तरशक्तिविकलः । धर्मस्थाः धर्माधिकरणनियुक्ताः । ते ह्यापृष्टाः किमयम् आलस्यात् प्रव्रजति, उत प्रव्रज्याफलदर्शित्वात्, किं पुत्रादीन् प्रतिविधायेति विमृश्य एनमनुजानीयुः । अन्यथेति अलुप्तव्यायामोऽपि आलस्याद् अनापृच्छ्य वा प्रव्रजंस्तैरेव नियम्येत बध्येत । पूर्वोक्तदण्डेन वा केवल . . . . . . वृथा प्रव्रजेदन्यतः ॥

वानप्रस्थादन्यः प्रव्राजितभावः प्रव्रजितविशेषः परिव्राजकः श्रमणादिः सोऽपि तत्र न वसेत् । ते हि कर्मफलानां भोक्तारो गार्हस्थ्याद् ग्रामनिवासित्वात् कर्मापवादेन निविष्टमप्युत्थापयन्ति । वानप्रस्थास्तु साग्निहोत्राः वनवासित्वाच्च न जनपदावस्थानेन धर्मोपघाताय । जनपदनिवेशेन सह यो जातः यो वा भूतपूर्वस्य जनपदस्य सहोषितः तस्मादन्यः सङ्घो वृन्दचरः । सजातीयानां वा सङ्घातानाम् अभोग्यः । धर्मार्थाभिवृद्धयनुकूलं समुत्थानम् । समुत्थाननिमित्तं यः समयानुबन्धः संहत्य प्रवृत्तिलक्षणः स सामुत्थानिकः । यथा—आगच्छत, आरामं सेतुबन्धं वा (कर्ता)स्म इति । ततोऽन्यः यथा—आगच्छत, संहत्य विहराम इति । नास्य राज्ञो जनपदमुपनिविशेत सेवेत इति ॥

विहारार्थाः क्रीडनार्थाः । शालाः पानगोष्ठीमण्डपाः कर्मविघ्नकरत्वात् । धर्मार्थास्तु स्युरेव । नर्तकाः छात्रादयः । वाग्जीवनाः

कथाकुशलाः । कुशीलवाः प्लवनलङ्घनादिष्वभियोगिनः (ये) तत्रैव वर्तन्ते । निराश्रयत्वादित्यादिना फलमनुवदति । आरामाद्यभावेन निराश्रयत्वम् । नटाद्यभावेन क्षेत्राभिरतत्वम् । विष्टिः वक्ष्यमाणलक्षणा । द्रव्यं सारदार्वादि । कुप्यमिति पाठान्तरम् । रसस्तैलादिः ॥

न केवलं निविशमानमेव प्रतिपालयेत् चिरोषितमपि सोपद्रवम् । तदाह—T. 115. परचक्रेति । ग्रस्तमुपद्रुतमित्यर्थः । व्याधिना दोषजेन दैवजेन वा । परिहरेत् परिहारेण पालयेत् । एवञ्च राजा इत्युच्यते । व्ययक्रीडाः व्ययप्रधानाः क्रीडाः ॥

अनुचितो दण्डः अनुचितः करः एषाम् अतिशयः प्रयोग आबाधः । कृषिं रक्षेद् यथा नावसीदति । तत्र अन्नबद्धत्वात् प्रजानाम् । ननु च निवेशोऽयं प्रकृतः न निविष्टरक्षणम् । कोऽत्र दोषः यदि निवेशप्रसङ्गेन रक्षणमुच्यते । अथवा एतदपि निवेशनं यदनूपस्थानम् । विषं स्थावरजङ्गमादि ॥

वल्लभाः कार्मिकाः । वणिक्पथकर्मणि शुल्कादौ नियुक्ताः । पशुसङ्घैरिति व्याघ्रैः हस्तियूथैर्वा पीड्यमानम् । अथवा वल्लभादिभिः पीडितं वणिक्पथम् । रक्षेदिति वर्तते । M. 49. क्षीयमाणं तृणलता-गुल्मादिभिः खिलीभवन्तम् । पशुसङ्घैः गोष्ठैः । शोधयेत् प्रकाशं कुर्यात् ॥

कृषिः पाशुपाल्यं वणिज्या च वार्ता । प्राधान्याद् रक्षणं स्वशब्देनैवाभिधाय एवमित्यनेन प्रकारेण द्रव्यद्विपवनादिकमपि यथायथमुपद्रुतं प्रवृत्तं रक्षेदिति अतिदिशति । नवान् प्रवर्तयेत् । चिरोषितोऽपि देशे न पूर्वप्रवृत्तैरेव सन्तुष्येदिति ॥

जनपदनिवेशः प्रथमं प्रकरणम् ।

॥ प्रथमश्चाध्यायः ॥

अथ द्वितीयोऽध्यायः ।

T. 116. शून्यनिवेशनसंबन्धेन एतच्छेषं भूमिच्छिद्रापिधानमुच्यते । कृषियोग्या भूमिः क्षेत्रम्, तस्य विभागो व्याख्यातः । कृष्यनर्हायाः छिद्रायाः विवीतादिभिः छादनमपिधानमिवेति । यत्तूक्तम्—"एवं द्रव्यं द्विपवनम्," "व्याधिभिश्च पशुव्रजान्" इति । तानि तत्प्रकाराणि च स्थानानि विवेश्यन्ते ॥

पशुव्रजस्थानमेव तावदाह—अकृष्यायामिति । पशवो ग्रामीणा राजकीया अन्ये वा पशुपालसम्बन्धिनः गावश्च खरोष्ट्रादयः । विवीतानि । विविधं वीतं येषु । विगतिकानि अशनखादनानि येष्विति यथासंभवं गत्यादीनां ग्रहणम् । प्रदिष्टाभयेति । अच्छेद्यतया च दत्ताभयानि वृक्षमृगादीनि येष्विति । ब्रह्मारण्यानि यत्र आरण्यकादि शास्त्रम् अधीयते । सोमारण्यानि यत्र यज्ञकर्माणि क्रियन्ते । गोरुतपराणि प्रकर्षेण क्रोशमात्राणि, ततः प्रकर्षे चोरव्यालाश्रयः स्यात् । तावन्मात्रमिति गोरुतमात्रम् । लता वल्लयः । गुल्माः शाखाप्रतानवन्तः करमर्दप्राचीरामलकादयः । गुच्छाः प्रताना बिम्बीवर्षकादयः । तैः स्वादुफलैः युक्तम् । विश्रामाशनार्थम् । उत्तानतोयाशयम् । श्रमतृष्णापनयनार्थम् । उत्तानत्वात् सुखेनावतीर्यते, ग्राहाद्युपद्रवाभावश्च । चतुष्पदा महिषगवयादय आखेटकार्थाः दान्तत्वान्न घ्नन्ति । व्यालाः व्याघ्रादयः । ते च बालावस्थायामेव भग्ननखदंष्ट्राः कार्याः तत्र । मृगयाशीला मृगयवः तेषां कर्म मार्गयुकं पञ्चविधं हस्तिशिक्षोक्तम् । तेन युक्ताः तत् कर्म गोशब्दे (?) गौण्या वृत्त्या मार्गयुकमिति व्यपदिश्यते । ते हि स्वयं मृगयाङ्गत्वाद् रूपमादाय विशस्य च स्वामिने समर्पयन्ति । हस्तीति जातिशब्दोऽप्ययं हस्तिनीकलभग्रहणाद् अप्राप्तमदेऽपि विशिष्ट एव वर्तते । मत्तस्य व्यालस्य च हस्तिनः क्रीडाङ्गत्वात्, मदोन्मर्दनदोषाच्च परिहारः । कलभः सप्तवर्षो वा अष्टवर्षो वा, ते च मार्गयुका यत्रेति विग्रहः । विहारार्थं क्रीडार्थम् । सर्वसाधारणोपभोग्यमित्यर्थः ॥

वनवशेन वेति । जनपदस्येति यदि स्याद् उक्तवनदाच्छेदासंभवन्ती (!) । रथाद्यपस्कारार्थम् । अपृथग्विधानमाह—कुप्यप्रदिष्टानामिति । कुप्याध्यक्षोक्तानाम् । एकैकश इति सजातीयानां प्रायेणैकत्र संवर्तिनियोगसंपदश्च भवन्ति (!) । चशब्दात् संकीर्णमपि । कर्मान्ताः द्रव्यच्छेदनपाटनादीनि । अटवीश्चेति । ताटस्थ्यादाटविकाद् रक्षार्थं विष्टयर्थश्च । (द्रव्यवनापाश्रयाः) द्रव्यवनमपाश्रित्य तज्जातपण्योपजीविनः । अन्त्ये वनवशेन वेति वर्तते ॥

T. 117. प्रत्यन्ते जनपदोपघातप्रतिषेधार्थम् । हस्तिवनं हस्तिनां निवासभूमिर्वनम् । तद्यथा—लौहित्यस्य प्रयागस्य गङ्गाया हिमवतश्च मध्ये प्राच्यं वनम् । जनपदस्य तदन्तःपातित्वादुपघातः स्यात् । तस्मात्तस्यैव प्रत्यन्ते निवेशयेद् व्यवस्थापयेत् । छेदाभावोऽ(त्र) त्रासनादिनिवारणेन । अटव्यारक्षम् । अन्यथा परोऽपि हस्तिबन्धं कुर्यात् । पूर्वमाश्रयत्वाद् द्रव्यहस्तिवनयोर्निवेशमात्रमुक्तम् । इह स्वकुप्यायामिति विषयप्रदर्शनार्थमुच्यते ॥

M. 50. इदानीं प्रचाररक्षणग्रहणानि अनन्तरवनसंबन्धेनाह—नागवनाध्यक्ष इति । अस्मादेवानुमतनियोगः । पर्वतादिचरत्वात् पार्वतादिव्यपदेशं चतुर्विधम् । ननु च नदी पर्वत उभयश्चेति त्रिविधः प्रचार उक्तः तन्त्रा(! न्त्री)न्तरे । सत्यम् । निवासभूमावेतानि स्थानानि संभवन्ति इति पालनापेक्षया भेद उक्तः । अनूप बहुपङ्कोदकप्रायम् । विदितो ज्ञातः पर्यन्तः प्रमाणं प्रवेशनिष्कासौ च तत्रस्थानां हस्त्युपघातिनां वा यत्र । नागवनपालास्तदायत्ता एवाटविकाः । हन्युरिति नागवनपालाः । आहरत इति अर्पयतः, नागवनपालस्य श्रमवधार्थम् । पानभोजनाय यातः(!) कुटुम्बार्थं पणचतुष्टयमिति उभयथास्य प्रीतिरुत्पादिता । लाभोऽध्यक्षेण कार्य इति शेषः ॥

हस्तिपको हस्त्यारोहः । पादपाशिकः पादपाशनियुक्तः । सीमको वनमर्यादाभिज्ञः । वनचरो लुब्धकः । पारिकर्मिको रज्जुवेण्वाद्युपकरणसंपादकः । तत्रस्थहस्तिमूत्रादिव्यवहितात्मगन्धाः । हस्तिनो भल्लातकि(!क)वृक्षं परिहरन्ति । अतस्तत्पत्रवतीभिः शाखाभिर्व्यवहितात्मरूपाः । शाखाग्रहणं वृक्षानुकारार्थम् । पञ्चभिः सप्तभिर्वेति । यथोक्तम्—

संयोगकामो नैराश्यं युग्माद्युग्मात्तु प्रतिपद्यते ।
अयुग्माद्यु रयेत्त(! मेता)स्माद् पूरणाशंसया वशः ॥

इति । हस्तिबन्धकयो हस्तिगणिकाः । शय्यास्थानं पांसुवालुकापङ्कादि । पथं पदनिक्षेपचिह्नम् । लण्डं पुरीषम् । कूलघातो नदीकूले दन्ताभ्याघातः । एत एवोद्देशाः । पर्यग्रं समग्रम् , अभिसञ्चारं वा ॥

T. 118. यूथचरं निर्यान्तं चारिणम् । निर्यूथं यूथान्निर्गत्य चारिणम् । हस्तिनम् अप्राप्तव्यपदेशम् । व्यालं दुष्टम् । निबन्धनेनेति एतावन्तो यूथचरा इत्यादिना गणनेन । अनीकस्थप्रमाणैरिति तदुपदेशैः । व्यञ्जनं लक्षणम् । आचारश्चरितं देवसत्त्वादिभेदेन । गृह्णीयुरिति ग्रहणोपायस्तन्त्रान्तरापेक्षयः । एतावांश्च हस्तिवनव्यापारः, अन्यद्धस्त्यध्यक्षकर्म वक्ष्यमाणम् ॥

हस्तिप्रधान इति प्रयासफलमाह । कथं प्राधान्यमिति चेदाह—परानीक इति । परशब्दः प्रत्येकमभिसंबध्यते । अनीकं सैन्यसङ्घातः । व्यूहदुर्गे वक्ष्यमाणलक्षणे । स्कन्धावारः कटकसन्निवेशः । एतान् प्रमर्दयन्तीति प्रमर्दनाः । कथम् । यस्मादन्येभ्योऽश्वरथादिभ्योऽतिमात्रशरीराः सेनानां प्राणान् हरन्ति ॥

वनानामुत्तमत्वादिभेदेन हस्तिनामप्युत्तमत्वादिभेदं दर्शयति—कलिङ्गाङ्गगजा इति ॥

तेषां प्रत्यवरा इति । प्रत्यवराः किमिति बध्यन्त इत्याह—सर्वेषामिति अधमानामपि । कर्मणा दम्यादिना । वीर्यम् उत्साहः कर्मण्यता । तेजः शौर्यं निर्भयत्वं चेति ॥

इति भूमिच्छिद्रापिधानं द्वितीयं प्रकरणम् ।

॥ द्वितीयश्चाध्यायः ॥

अथ तृतीयोऽध्यायः

T. 119. M. 51. भूमिच्छिद्रापिधानजनपदनिवेशानन्तरं तदनन्तराया दुर्गप्रकृतेः निवेशार्थं दुर्गविधानमेव तावदुच्यते । "अन्तेष्वन्तपालदुर्गाणि" (अधि. २, अध्या. १) इत्युक्तानि । तानि किंजातीयानि किंविधानि

अनन्तरं तद्विधानमुच्यते—चतुर्दिशमिति चतसृषु दिक्ष्वित्यर्थः । जनपदान्ते स्वजनपदरक्षार्थं परजनपदपीडार्थञ्च नाम्यन्तरगतं तन्त्रस्थानीयं वक्ष्यमाणम् । साम्परायिकं सम्यक् प्रकृष्टम् अयो गमनम्, निरायासेन प्रकृष्टा गतिः साम्परायः । "तस्मै प्रभवति—" (५-१-१०१) इति । दैवकृतम् अयत्नेनैव जातम् ॥

तत्र संभवश्चतुर्विधः । द्विर्गता आपो यस्मिन् देशे स द्वीपः, तस्यान्तः अन्तर्द्वीपम्, राजदन्तादेराकृतिगणत्वात् पूर्व(? पर)निपातः यथान्तरङ्गमिति । स्थलं वा निम्नेन चोदकेन समपङ्केन वा अवरुद्धं प्रस्तम् । एतद् द्विविधम् औदकम् ॥

प्रस्तरस्योपरि भवं प्रास्तरं शिखरमेव समन्ततः टङ्कच्छिन्नपार्श्वत्वाद् दुर्गमम्, तदात्ममार्गादिकरणेन संस्कार्यम् । समन्ततः प्राकारवत् विषमपर्वतेन परिक्षिप्तो महानवकाश एकद्वारो गुहावत् । गुहावतो (अ)विषमकरणेन संस्कुर्यात् । एतद् द्विविधं पर्वतस्योपरि भवं पार्श्वे वा पार्वतम् ॥

निरुदकस्तम्बम् आत्मोपभोगव्यतिरिक्तमुदकं स्तम्बाश्च अश्वगज-पशुसार्थाः परस्य यत्र न सन्ति । इरिणं वा ऊषरप्रायवान् (यं?) अन्यत्रोत्पादि-तात्मसंभोगमात्रपर्याप्ततृणोदकम् । एतद् द्विविधं धन्वनि भवं धान्वनम् । वप्रादिभिरश्मनिचयैश्च संस्कुर्यात् । धन्वा निर्ज(नो? लो) देशः ॥

खञ्जनोदकं विच्छिन्नप्रवाहोदकं, क्वचित् क्वचिदुदकमिति यावत् । स्तम्बगहनं वा स्तम्बैर्बदरीवेकङ्कतादिभिः गहनम्, वृक्षसंकुलं वा वनग्रहणात् । तद्रूपं वनदुर्गम् । परिखादिभिः निचयैश्च संस्कुर्यात् ॥

एषामुपभोगमाह—तेषामिति । जनपदारक्षा अन्तपालाः, तेषां स्थानम् । तत्रस्थाः परैरधृष्या जनपदं रक्षन्ति । धान्वनवनदुर्गाश्रयाश्चाटविका यापयन्ति । परेषां बाधकाश्चाधृष्याश्च भवेयुः । आपदि परामियोगलक्षणायाम् अपसारो वा [1]कलत्रस्थानं जनपदस्य । एतच्च दैवकृतमुत्तमम् ॥

अन्यथा यत्नेनापि तत्कार्यमिति दर्शयन्नाह—जनपदमध्य इति । समुदयस्य समाहर्तृसमाहृतस्य कोशस्य स्थानं स्थानीयं राज्ञोऽपि स्थानाय हितं

---

1. "कलत्रन्तु नृपादीनां दुर्गस्थाने" इति केशवस्वामी ।

निवेशयेत् । निवेशनं चास्य वक्ष्यति, रचना तावदुच्यते । वास्तुविद्यामधीयन्ते वास्तुकाः तैः प्रशस्ते । ह्रदो देवखातः । सरोऽदेवखतं तटाकं पुरुषकारनिष्पन्नम् । अङ्के पार्श्वे । वृत्तादिग्रहणं त्रिकोणसर्पकुटिलार्धचन्द्राकृतीनाम् अप्रशस्तत्वाच्च निवृत्त्यर्थम् । T. 120. वास्तुवशेन वेति यथा यथा वास्तु लभ्यते तथा तथा वृत्तादिकं कुर्यात्, सर्वासु दिक्षु सुलभजलत्वाद् वृत्तं चतुरश्रं वा, दीर्घह्रदादीनामेकपार्श्वजलत्वाद् दीर्घम् । पण्यपुटभेदनमिति दिगन्तरागताः क्रयविक्रयार्थं यत्र पण्यपुटा भिद्यन्ते व्यवह्रियन्ते । कुत एतत्, अंसपथवारिपथाभ्यामुपेतत्वात् । अंसपथः कायभारखराश्वोष्ट्रशकटादिमार्गः । वारिपथो नौयानपात्रादिः ॥

तस्येति स्थानीयस्य । समन्तात् परिखन्यन्त इति परिखाः । दण्डान्तरा इति अन्योन्यतो दण्डेन प्रमाणेनान्तरिताः । ततो न्यूनान्तराः विशरणादेकीभवन्ति, अधिकान्तराः परकीयाणाम् आश्रया भवन्ति । चतुर्दश द्वादशेति स्थानीयस्य प्रकृतत्वात् ततःप्रभृति क्रियाक्रमः । आभ्यन्तराः विस्तारेण चतुर्दश दण्डाः । मध्या द्वादश दण्डाः । बाह्या दश दण्डाः । विस्तारात् पादोनमवगाढाः[1]—आद्यायाः अवगाढो दश दण्डाः दण्डार्धश्च । मध्यमायाः नव दण्डाः । बाह्यायाः सप्त दण्डा दण्डा(र्धश्च)[2]र्धानि (?) अरत्निद्वयश्च आद्यायाः । चत्वारो दण्डा मध्यमायाः । त्रयो दण्डाः (सप्ता?)अष्टाङ्गुलोऽरत्निरिति चान्त्यायाः, यथा आनुपूर्व्येण खातानां स्थैर्यं भवति । मूलचतुरश्रा वेति मूलेन सह चतुरश्रा वा, भूमेः स्थैर्यमवेक्ष्य यथा ह्यगम्यतरा भवन्ति । पाषाणोपहिता यत्र दण्डमात्रमन्तरं तस्य स्थैर्यार्थं तत्रैव पाषाणैः प्रमादाद् दत्राग्निकीपाशः (?) तोयान्तिकीर्वा उद्भिज्जान्तोदकासंभवे वा आगन्तुकेन तोयेन पूर्णाः । तस्माच्च निस्तोया इति च । उपलक्ष्यमूलार्थत्वात् सपरिवाहा इति । अतिरिक्तोदकस्य निष्क्रमत्वाद् अन्योन्यसंप्लवः उपप्लवोपघातश्च मा भूतामिति परानुपलक्षितेन यन्त्रेण उदकं बहिर्निष्कास्यते । खातविधिरुक्ता ॥

---

1. अवगाधा इति मुद्रितमूलकोशेषु दृश्यते । अवगाढा इति चाणक्यटीका । अवगाधशब्दस्य निम्नार्थत्वम् अनन्तशयनव्याख्यानोक्तम् अतस्तत्परं वेदितव्यम् ।

2. इतः परम् "अर्धमवगाढाः—आद्यायाः सप्त दण्डाः, मध्यमायाः षड् दण्डाः, बाह्यायाः पञ्च दण्डाः, त्रिभागमवगाढाः—चत्वारो दण्डाः अष्टाङ्गुलम्" इत्याकारको ग्रन्थभागो मातृकायां त्रुटितो भाति ।

चतुरो दण्डान् अपकृष्टमपसृतं परिखायाः वप्रस्यान्तरत्वाद् आभ्यन्तराया इति गम्यते। अवरुद्धं पाषाणैर्बद्धपार्श्वम्। द्विगुणविष्कम्भम् उच्छ्रायात्। द्वादशदण्डमित्यर्थः। खातादिति। खातप्र(तलैः! सृतात्)पांसुप्रकरात्। ऊर्ध्वचयमिति ऊर्ध्वं चयो यस्य तं वल्मीकनिकरसंस्थानम्। पांसुविशेषवशेन वा ततोऽप्यगम्यं मञ्चकपृष्ठं कुम्भकुक्षिकं वा कुम्भाकारसंस्थानम्। T. 121. दृढीकरणार्थं हस्त्यादिभिः संक्षोद्य संक्षोद्य रचितम्। M. 52. कण्टकिगुल्मैर्विषवल्याश्च प्रतानेन मारणार्थं बहिःपार्श्वे युक्तम्। वास्तुच्छिद्रं नगरस्य निम्नम्। पांसूनामल्पत्वे राजवास्तु वा॥

द्वादशहस्तादूर्ध्वं यथायोगम्। ओजमयोदशादिहस्तसङ्ख्यं त्रयोदशपञ्चदशेत्यादिकम्। युग्मं वा समहस्तसङ्ख्यं चतुर्दशषोडशेत्यादिकम्। अर्धत्रयोदशादिहस्तनिवृत्त्यर्थमुभयग्रहणम्। आ चतुर्विंशतिहस्तादिति। परेण प्रकर्षेण चतुर्विंशतिहस्तोत्सेधम्। तेन ऊर्ध्वं द्वादश प्राकारा भवन्ति। तेनैव षड्ढस्तादूर्ध्वम् आ द्वादशहस्तादिति विष्कम्भस्यापि द्वादशविधत्वम् उत्सेधार्थतयैवोक्तं वेदितव्यम्। रथचर्येति। "पञ्चारत्नयो रथपथः" (अधि. २, अध्या. ४) इति वक्ष्यति। पन्थाश्चर्येति चानर्थान्तरम्। तत्प्रमाणम् ऊर्ध्वं युध्यमानानां संचारो यस्य प्राकारस्येति। षड्ढस्तमूलः शनैर्हीयमानः हस्तन्यूनोऽयं पञ्चारत्निकः पञ्चारत्निप्रदेशः। प्राकारापेक्षया मध्य (! मूल)षड्भागोनशिरस्काः द्वादशापि प्राकाराः कार्याः। तालमूलमिति। तालस्येव मूलं यस्येति शिफाभिरिव पाषाणादिभिरुपचितमूलं सन्धितम्। इष्टकामुखमात्रविस्तारैर्योधावरणकुड्यकैर्मुरजसंस्थानैः समशिरोभिः, कपिशीर्षकैश्च अश्वत्थपत्रसंस्थानैरेकान्तरैः आचिताग्रम्। बहिःपार्श्वं इति प्रयोजनापेक्षया नेयम्। यद्येवं तद्वदेकदेशत्वात् कथं रथचर्यामात्रसंचारः इति। एकदेशहानेरपि व्यपदेशानिवृत्तेः। न चात्र गतागतमेव संचारोऽभिप्रेतः। किं तर्हि सम्यग्रयावरणम् तदङ्गभूतान्येव वावरणानीति। तैः सह रथचक्र (! र्या)प्रमाणत्वम्। विस्तीर्णादि(!भिः) शिलाभिः संहतं निच्छिद्रं(!चितम्) शैलं वा प्राकारम्। ईदृशमेव न त्वेव काष्ठमयं स्तम्भाभिखन्य कारयेत्। दोषमाह—अग्निरिति। अवहितः सुनिहितः॥

विष्कम्भेन समविस्तारायामः। कः पुनरस्य विष्कम्भः इति चेत्, प्राकारशिरोभागाश्रयस्यास्य पञ्चारत्नयः (तेन सहेष्ठन्तो विस्तृतस्य भावा।

पर्याप्तमिति उत्सेधस्यवस्योपरि निरसङ्गं साधु यत्र व्याप्रियन्ते (?)) प्राकार-प्रकरणाद् ऊर्ध्वं पञ्चारत्निप्रमाणाधिकः तत्सम एव (आ)प्राकारमूलाद् अवक्षेपो निर्गमो यस्य स एवंविधः सोपानो यस्य इष्टकामयः फलकामयो वा। उपर्यारोहणमपि एतत्सोपानेनैव । त्रिंशद्दण्डान्तरं चेति अट्टालकानामितरेतरं त्रिंशद्दण्डान्तरः समन्तात् कार्यः । अट्टालकाति(रिक्त)देशे चोपरिष्टान्मुरजाः कपिशीर्षकाश्च स्युरिति ॥

T. 122. द्वयोः द्वयोः अट्टालकयोर्मध्ये समन्तादेव सह हर्म्येण द्वितला विस्तारादध्यर्धेनाधिकायामा प्रतोली ॥

अट्टालकप्रतोल्योर्मध्ये त्रयो धानुष्का यावत्यस्मिन्नवकाशे सुखेन व्यायच्छन्ति तत्प्रमाणम् । सापिधानं सावरणपट्टं स्वशरनिर्गमार्थं परशरवारणार्थञ्च अधोमुखच्छिद्राः सर्वे एव फलका यस्य तत् । सुश्लिष्टपट्ट-सन्धिकमिति इन्द्रकोशसंज्ञिकं कारयेत् । कोष्ठफलकमित्यर्थोक्तम् ॥

अन्तरेष्विति । अट्टालकप्रतोलीन्द्रकोशान्तरेष्विति । पार्श्वं इति प्राकारमूलरक्षार्थत्वात् । बाह्ये तुला बहिर्निष्कास्य, अष्टहस्तायामं संश्लिष्टभूमित्वाद् देवपथमिति ॥

दण्डान्तरा द्विदण्डान्तराश्चेति अट्टालकादिशून्ये देशेऽभ्यन्तरतोऽधि-काराद् द्विहस्तविस्तारा एव । इष्टकामयीः फलकमयीर्वा । किमुत्सेधाः, यत्र चरन्तः प्राकारगुप्ता........द्रणपरा विध्यन्ति । अट्टालकादिस्थास्तु उपदिष्टाः (? विष्टाः) शयिता वा विध्यन्तीत्ययं विशेषः ॥

अप्रमाद्य इति परैरप्रमाद्येऽधृष्ये खातगुप्ते । प्रधाविततिकामिव प्रधाविततिकां गोमूत्रिकया पुरुषप्रमाणं क्षुद्रप्राकारं महाप्राकारात् अबहिः आ. महाखातं प्राप्तानुखातमेव किञ्चिदावृतं योधरक्षार्थम् । निष्करद्वारञ्च प्रधाविततिकान्तरेण, येन निष्पत्य अनुप्रकारमूलं युद्धाय कीर्यन्ते योधाः । स(? त)चैकं सत्येकत उभयतो वा महद् द्वारम् अप्रमाद्ये देशे समस्यैव एकैकमिति चतुर्दिशमष्टौ वाऽपरि।वा निष्करद्वाराणीति ॥

T. 123. बहिरिति तृतीयपरिखाया बहिः । जानुभञ्जिनीः शरभा इवाष्टभिः जानुमात्रोत्सेधैः पादैः क्षिप्तजानुभञ्जनयोग्याः सारदारुदण्डाः । वेणुखदिरादिमयानां शूलानां प्रकरः पङ्क्तिः । कूपः शुष्कावटः । कूटं मृगपातयन्त्रम् । अवपातो हस्तिग्रहणार्थः । कण्टकप्रतिसरः सर्पत्वे (?) मुखकण्टकमाला । अहिपृष्ठं निर्मांसाहिपृष्ठास्थिसंस्थानं लोहमयम् । M. 53. [1]तलपत्रं क्षुरसंस्थानम् आतपत्रबद्धावृतम् (?)। शृङ्गाटकं त्रिकण्टका मण्डूकी । श्वदंष्ट्रा गोक्षुरकस्थानीया । अर्ध (? अर्गलं) छिद्रावलम्बी वृक्षः । उपस्कन्दः विच्छिद्रा(? पिच्छिला)[2] भूमिः । पादुका तत्प्रमाण एव कण्टकोपचितः पांसुच्छन्नो गर्तः । अम्बरीषको भ्राष्ट्रे निस्यो(? निहितो)ऽग्निः । उदपानम् उदकपूर्णं कूपम् । तैश्छन्नोऽनुमार्गदेशः छन्नपथः संचारः ॥

(द्वार)विधानमुच्यते—प्राकारमिति । अध्यर्धदण्डनिष्कासप्रवेशमार्गमवशिष्य तमुभयतः "उभसर्वतसोः कार्या" (वा. २-३-२) इत्यादिना द्वितीया । तस्योभयपार्श्वयोः कृत्वेत्यर्थः । किं कृत्वा । प्राकारम् । किंसंस्थानम् । मेण्ढकारमिव बाहुप्राकारम् । संक्षेपतस्तद्यथा—पञ्चदण्डस्य प्रतोलीद्वारस्य तावत् षड्ढस्तान्मार्गाद् अधिकाश्चतुर्दण्डहस्ताः तानुभयतः सप्त हस्ताः प्राकाराग्रान्मेषघोणवन्निष्क्रान्ताद् अपकृष्य अर्धतृतीयदण्डप्राकारमध्येन सहान्तर्बहिश्च बाहू प्रसार्य मेषशृङ्गवन्मार्गाभिमुखौ सप्त सप्त हस्तान्निवर्तयेत् । तदेवं षड्ढस्ताग्रमुखे प्राकारमस्तके तुला धरण्यास्तिष्ठन्ति । प्रतोलीमिव प्रतोलीसंज्ञकं द्वारं षड्वान्तराणि(?) सप्तानां तुलानां तुलावष्टम्भदेशादूनत्रिहस्तप्रमाणानि यस्य ....(निवे)शयेत् । तेन मेढकच्छेदमात्रं तुपा(? द्वा)रमिति कथयन्ति । षट् प्रतोलीषट्तुलान्तरमिति समासमपीत्यन्ये, प्रतोलीसंबन्धीनि तादर्थ्यात् षट्तुलान्तराणि षड्द्वारम् अर्थात् प्रतोलीसंज्ञकमिति व्याचक्षते । पञ्चदण्डादेकेनोत्तरोऽधिको यस्य निवेश इति । अष्टदण्डादिति प्राकारापेक्षया द्वादशविधस्य हस्तोत्तरोऽप्येतत्प्रमाणं (?) चेदमेवं समविष्कम्भत्वात् । चतुरश्रं चतुरश्रमेवलेनेत्याह(?) षड्भागमिति । पञ्चदण्डायतस्य विस्तारः षष्ठाङ्गुलः त्रिहस्ताधिकः । षड्भागं वेति अर्धतृतीयहस्ताधिकविस्तारः एतद्द्वादशविधस्याप्युत्तरषड्भाग अष्टभागश्चाप्यूह्यः ॥

1. 'तालपत्रम्' इति मुद्रितकोशपाठः ।

2. 'उपस्कर:(?)न्दः प्रस्खलिनी भूमिः रथपुटपिच्छिला', इति वैजयन्ती ।

पञ्चदशहस्तादिति । द्वादशहस्तस्य प्राकारस्य पञ्चदशहस्तस्तलोत्सेधः एवमुत्तरत्रापि षडङ्गुलवृद्धिर्योज्या ॥

द्वारबन्धनस्तम्भानां तुलासन्धारकाणां च प्रमाणमुच्यते । परिक्षेपः स्थूलता ते षड्ढस्तस्तम्भस्य दैर्घ्यं, नायामस्यानेन लक्षणमुच्यते । पञ्चदशहस्तः तलोत्सेधः तेनैवास्य निर्ज्ञातत्वात् अथ (?) तृतीयहस्तत्वं परिक्षेपस्यैव लक्ष्यते । गुणनिर्देशं तूत्तराः । द्विगुणो निखातः परिक्षेप एव द्विगुणः पञ्चहस्तो निखातः। चूलिकायास्तम्भशिखायाः तुलाफलकसन्धारणार्थायाः संबन्धी परिक्षेपादेव चतुर्भागः पञ्चदशाङ्गुलः परिणाहेनेति बोद्धव्यम् । दैर्घ्यं तु तुलापरिणाहा-देवार्थोक्तम् । वाशब्दस्य सापेक्षत्वात् । क्रमवशेन किञ्चिन्न्यूनोऽप्यधिको वेति व्याख्येयम् । अपरे त्वाहुः—चूलिकायाश्चतुर्भागो निखात एवोर्ध्वतुलोपरि-च्छेदस्त्वधो न्यासपट्टेष्विति ॥

आदितलस्येति । आदिभूमेरुपरिष्टाद्यस्तलस्तुलापट्टं(?ट्टः) चतुरश्रः पञ्चदण्डादिप्रमाणायतस्य पञ्च भागाः कर्तव्याः । ततः प्रथमो दण्डः शालासंस्थान-तिर्यगायतः प्रहरणाहरणादिस्थानार्थं......स्यात् । मध्यपञ्चमभागो वापीसंस्थानः चतुरन्तैस्तटैरिति च परिक्षितोभय.........त्यच्छन्नत्वात् सुषिर एव । तथा हि—तुलामात्रोपस्थितविरलविरलपट्टगताः पुरुषाः कवाटभङ्गोद्यतानधोभूमिग-तान् प्रविशतो निवारणे पाषाणशूलमुसलादिभिः परान् घ्नन्तः उभयोः कवाटयो रक्षां कुर्वन्ति । षड्ढस्तात् प्रथमद्वाराद्रुभयतः अष्टावष्टावङ्गुलानि तदधिकऋज्वायतं च मध्यदण्डत्रयमिति तृतीयः पञ्चमभागो वार्थः तैश्च छिद्रैः परान् निघ्नन्ति तदपि शालाप्रमाण-संस्थानमेव छिद्राधिकं तु तत्स्यात् । दशभागिकाविति वाप्यास्तूभयतो यौ तत्प्रमाणौ त्रिदण्डायतौ षोडशाङ्गुलाधिकषडन्तविस्तीर्णौ पञ्चभागौ तयोरर्धमर्धमवच्छिद्य आर्धोच्छ्रायौ द्वौ प्रतिमञ्चौ फलकाहतौ स्याताम् । उभयतश्चैतौ दशभागिकाविरयुच्येते । तौ प्रमाणतः त्रिदण्डायतावेव अष्टाङ्गुलाधिकत्रिहस्तविस्तीर्णौ तत्रस्थानीयौयाः(? कयौधाः)कवाटारक्षणा-मात्मीयानां परेषां च प्रवेशनिष्कासपरिज्ञानं कुर्युः । अन्तरमाणीति(? णी इति) यत्तयोः प्रतिमञ्चयोः पृष्ठतो दशभागद्वयमवशिष्टं निस्तलान्तरं चारार्थमन्तरद्वार-मित्यर्थः । तस्याणित्वं सामर्थ्यप्राप्तम् । अस्यै(व) त्वाणीति(?णी इति) द्विवचनान्त-मेवाभिधीयते । तस्य प्रयोजनापेक्षं प्रमाणमास्थाप्य शेषो हर्म्यवदिष्टकारचिता-

रक्षिकभूमिकमेव स्यात् शयनासनयोग्यम् । ननु चाणिरिति छिद्रापिधानमुच्यते, तद्योगाच्चाणिमाण्डव्य इति । नैष दोषः, छिद्रसाहचर्यात् कीलाभिधानं स्यात् । तथा चाणिद्वारं नि(?)च्छिद्रिकाद्वारं वक्ष्यति ॥

अपरे त्वाहुः—बाह्यः पञ्चभागः शालामध्ये क्वापि तस्यां सीमागृहमुभयतो- द्वारप्रकारसीमत्वार्थम् । अभ्यन्तरपञ्चभागो द्विधा विभक्तो द्वौ प्रतिमञ्चकाविति । तत्र विभागे प्रयोजनाभावः । यद्वान्तरं वा विच्छिद्राणि कवटावापस्यौ (?) हर्म्यस्य बाह्यतश्चतुर्षु पार्श्वेषु स्थूणाः कृत्वा तासामुपरि फलकास्तृतकुट्टिमस्थान- मुच्यते । वर्धमानच्छेदमध्योन्नतस्तलबन्धश्चेति । तथा नाम यथायुज्यते को दोषः ॥

द्वितीयं तलमाह—समुच्छ्रयादिति । आदितलस्य पञ्चदशहस्तस्य प्रकृतत्वात्तस्येह योऽर्धादष्टहस्तसमुच्छ्रायं तलं द्वितीयमिति । अर्थात् पर्यवसाना- याम्[1](?)............कथं तदुत्थाप्यत इत्याह—स्थूणाबन्धश्च अस्य कार्य इति शेषः। स्थूणासु क्षुद्रस्तम्भिकासु तलोऽस्त्येव। तत्र निखातव्या इत्येतन्निखातयोग्याः स्थूणाः स्युः विस्तारादितलस्यैव स्यात् । अन्ये त्वाहुः—अर्धमिष्टकाभिरुत्थाप्य तत्रोपरि स्थूणावबन्ध इति । अर्धवास्तुकमिति अर्धतृतीयां दण्डानां काश- तृतीयार्थमवस्थाप्य (?) अग्रतः पृष्ठत उभयतो वा तत्प्रमाणमवशिष्टे भागे स्याद् अगारमेतन्मध्योन्नतः तलभागमेव कर्तव्यमित्यन्ये । तथा च शुकपञ्जरमिति तदाख्यायते द्रमिडैः वालाग्र[2] चोतिचोन्याचार्यैरिति(?) । भागान्तरं वेति उत्तमागारं शून्यतृतीयो भागः षोडशाङ्गुलाधिकोऽप्यर्धदण्डः स्यात् । अस्य तु स्थूणाबन्धवचनं सिद्धमेव, शोभनार्थं युद्धार्थं दिगवलोकनार्थं त्वेतत् । T. 125. प्राकारमूलात् प्रभृति तलारोहणार्थं सोपानविधिमाह—द्वारस्य निर्गते वा इष्टकावबद्धपार्श्वमात्रं काष्ठमयं तु शैलमित्यन्ये । प्रदक्षिणावस्थितं सोपानं मञ्चार्थं द्वितीयतलारोहणार्थं स्यात् । गूढं सुगुप्तं महाजनेनालक्षितं भित्तिगतमेव सोपानं महापुरुषार्थ(?)रोहणार्थम् । दक्षिणःस्यात् (? रक्षिणोऽस्माद्)

1. इतः परं मातृकायां पत्रार्धपरिमितो ग्रन्थभागः "पराजेरसोढः" (१-४-२६) इत्यादिपाणिनिसूत्रव्याख्यारूपः ग्रन्थान्तरात् प्रक्षिप्तोऽस्ति ।

2. मृच्छकटिके प्रासादबालाग्रप्रतोलिकायां निगडबद्धः स्थावरकश्चेटः जीर्णगवाक्षेणाऽधः पतितो चारुदत्तम् [illegible] स्मरते ।

गूढभित्तिसोपानेन अवतीर्यान्यं वेषमात्मनः कृत्वा दृश्यमानसोपानपङ्क्त्या पुनः समारोहन्ति । प्रभूतजनव्यापनार्थम् । एतच्च रथ........तमेव स्यात् । आपदि तदुद्घाट्यते ॥

द्विहस्तमिति द्वारबन्धकाष्ठादुपरि द्विहस्तमात्रार(?)शिखाभित्तिः स्यात् । अतश्च पञ्चदशहस्तोच्छ्रितस्य देहलीपट्टं हस्तमात्रं परिकल्प्य द्वादश-हस्तोच्छ्रायं षड्ढस्तविस्तीर्णं विस्तारद्विगुणायतं द्वारम् एवम् इतराम् (?) अप्यनया कल्पनया प्रमाणाधिक्यं योज्यम् । त्रिपञ्चभागिकाञ्छतपति(?)कौ द्वाविति महाद्वारस्य कवाटस्थानमाह—तलस्येव दण्डप्रमाणान् पञ्चभागान् कृत्वैकैकं पञ्चभागः बहिरुभयतोऽवाभ्यान्तर्गतपञ्चभागाः (?) कर्तव्याः ते विद्यन्ते ययोस्तौ प्रथमद्वितीययोश्चतुर्थपञ्चमयोर्मध्ये द्वौ कवाटयोगौ स्यातां कवाटद्वयापेक्षत्वात् । योगग्रहणमुद्धाटसौकर्यार्थम् । न चैको महान् कवाटो दण्डमात्रे शालावस्थिते पञ्चमभागे सम्मातीति वचनात् । कवाटयुगद्वये द्वौ परिघौ द्वौ द्वौ परिघार्गलौ कवाटयुगस्यैकैकस्याभ्यन्तरे तत्साधारणार्थौ स्याताम् । अरत्निरिन्द्रकील इति निखननोत्खननसुखत्वात् काष्ठविपरीताग्रयगर्तग(त) इन्द्रध्वजकीलो हस्तमात्रः अतश्चेन्द्रकील इत्युच्यते । स हि द्वारं पिधाय कवाटयुगसन्धिश्लेषणार्थं निखन्यते । अपवारणे चेदमिति नोक्तम् । हस्तिपरिघा इति । पञ्चभागः मनुष्याणां गवाश्वस्य वा निर्गमनार्थं पञ्चहस्तमेवार्धादर्धतृतीयहस्तविस्तारम आणिद्वारं छिद्रिकाद्वारमित्यर्थः । अन्यत्कवाटार्गलाधर्षप्रासागाराद्बहिः हस्तिप्रतिघातक्षमा-र्थामिव(?) परिघाः स्युः द्वाररक्षार्थम् ॥

निवेशरक्षार्थमिति द्वारनिवेशस्य स्थानस्यार्धतृतीयस्थानं हस्तिनखाकारं पुरोनिर्गतान्तःप्रविष्टत्वात् हस्तिनखवद्धस्तिपादाघातप्राकारमूलत्वात् उभयतो-मार्गनिर्गतं हस्तिनखसंज्ञं द्वारपालानां जागरकाणां चाश्रयार्थम् । अन्यस्त्वाह— अतु(?कि)न्दद्वयमित्यर्थः । यत्रोच्यते हस्तिनखेष्वत्रकं प्रतीकार इति (?) । अन्यस्त्वाह—

> द्वाराद् बहिः पुरस्ताच्च कुर्यात् करिनखं दृढम् ।
> तया वा गच्छतां वेगाद् भवेद् तु(?म)न्दनिभा गतिः ॥

इति । मुखसमद्वारं मुखसमोऽस्यार्धदण्डविस्तारः । संक्राम्यन्त्यनेनेति संक्रमः । खातमुखसमश्चतुर्दशहस्तविस्तार इति केचित् । तदयुक्तम् । द्वाराधिकारस्य

विस्तारस्यानर्थक्यात् । स च संहर्तुं शक्योवष्टम्भ्य(? अवष्टम्भ)फलकः । स्वकार्यपरिसमाप्तौ हस्तिनः कथमनुप्रवेश इति चेद् ऊ(?द)दैः फलकैरेवोदकच्छन्नैः तथा खाततीर्थेन तदत्र प्रतिविधानमेवैतत्स्यात् । भूमिमयो वा निरुदके स्थाने एतावती भूमिं नैव खन्यादित्यर्थः । उक्तं प्रतोलीद्वारम् ॥

गोपुरद्वारस्य पूर्वस्माद्विशेषमाह—प्राकारसममिति । प्रतोलीद्वारे द्वादशहस्ते प्राकारे पञ्चदशहस्तोच्छ्रिता प्रथमा भूमिः । अत्र तु द्वादशहस्तोच्छ्रायमेव मेण्ढकविभागं मुखमवस्थाप्य त्रिभागगोधामुखमिति उभयतः षोडशाङ्गुलावध्यर्द्धोदपरिकल्य (?) ततस्तत्प्रमाणं सतस्तम्भमालं प्राकारं निष्कास्यामेऽध्यर्धदण्डं प्रवेशनिष्कासार्थं गोधामुखसंस्थानायामं परिकल्प्य गोपुरसंज्ञकं द्वारम् , अन्यत् प्रतोल्या समानम् । एतत्तु तोरणशिरोऽवशिष्टदशहस्तोच्छ्रितं द्वारं तुलापेटप्रतिबन्धं परिकल्प्य तोरणशिरसा सह द्वादशहस्तमेव व्याख्येयम् ।

M. 45. प्राग्द्वारमध्य इति मेण्ढकाल............दप्रकाराणां मध्ये वापीं कृत्वा वापीसंस्थानेन पञ्चदण्डान् समन्ततोऽतिरिक्तानवकल्प्य पुष्करिणीसंज्ञकं कारयेत् । अन्यत् प्रतोल्या तुल्यम् । अत्र प्रथमकवाटयुगरक्षार्थं प्रथमतलादङ्कता निष्कासनीया, आणिद्वारञ्च अग्राह्ये देश इत्यध्याहार्यम् । चतुश्शालमिति चतस्रः शाला दण्डमात्रविस्तीर्णाः समन्ततः परिकल्प्य यत............ष्टं त्रिदण्डायतं विस्तीर्णमन्तरालं तस्याध्यर्धं भागमुभयत एकतो वा पादास्तृतं कृत्वा ततोऽध्यर्धं द्वाररक्षार्थं वृत्तं कुर्यात् । अध्यर्धमिति वाप्या एव द्रष्टव्यम् । आभ्यन्तरबाह्ययोः शालयोरुभयतो दण्डमात्रौ पक्षौ कृत्वा ततोऽध्यर्धभागं त्रिदण्डायाममात्रं विवृतं कुर्यात् । केचित् सान्निकमिति समन्ततः ताण्डमाच्छिकर्याणि विदित्यन्ये पठन्ति (?) । तेषामेष एवार्थः आणिद्वारवदिति तुल्यं व्याख्यानम् । सर्वत्रास्य भावात् आणिकमित्यपात् एवार्थाभावात् (?) आलोकनच्छिद्रसादृश्याचैतत् T. 126. । कुमारीसंज्ञकं द्वारमेकतलमिति मुण्डहर्म्यं द्वितलमिति उत्तमागाराभावान्मुण्डकेन शुद्धेन हर्म्येणैव सह द्वितलप्रतोलीद्वारकल्पं तं मुण्डकद्वारं पञ्चद्वारवितानानि यथेष्टं कार्याणि । अथवा भूमेः समत्वविषमत्वविस्तीर्णानि द्रव्याणि चोपकरणादीनि महान्ति हस्तानि यथोक्तं विधिं कल्पयेत् । त्रिभागावधिकायामा इति परिकल्पिताद्विस्तारादष्टहस्तविस्तारत्वं द्वादशहस्तायताः । सांग्रामिकभाण्डवाहिनीः कुल्या[1] नुपपरिका(?)अपवरकान् अर्थात् प्राकारस्याभ्यन्तरेऽनुप्राकारं कारयेत् ॥

---

1. कौटलीयस्य केरलभाषाटीका कुल्याशब्दस्य कोष्ठकार्थमाह ।

भाण्डानि कथयति तास्विति—(पाषाण इति) यन्त्रगोष्पणाः पाणिक्षेप्याः । कुद्दाला इति खननदारणार्थानामुपसंग्रहः । कुठारीति वास्यादीनां दारुच्छेदनोपकरणानाम् । काण्डकल्पना इति काण्डसंस्कारोपकरणानाम् [1]मुसुण्ठीति कीलबहुलो वर्तुलः काष्ठविशेषः । गदाप्रकाराणां मुद्गरा इति संचूर्णानां(?) गदानाम् । दण्डा इति क्षेप्याणां दारुमयानां मुक्तसाधितानाम् । चक्राणि आयुधानि । यन्त्राणि पाषाणादिक्षेपणोपकरणानि । शतघ्नयः कीलसहस्राचिताः स्थूलपरिघाः युगपद् बहूनामपि घातनार्थाः ॥

कार्याः तास्विति संबध्यते । कार्मारिकाः कर्मारनिर्मिताः । शूलाः वेधनाग्राः तीक्ष्णत्वादीर्घवेणवः । उष्ट्रग्रीवी उष्ट्रग्रीवाकारा दात्राकृत्या कचग्रहण्येव । अग्निसंयोगाः दुर्गलाभे वक्ष्यमाणसर(ल)देवदार्वादिः कुप्याध्यक्षे च सारदारुलोहादिसंग्रहे यो विधिः सोऽत्राप्यापदि कार्यः ॥

इति भिक्षुप्रभमतिकृतायां चाणक्यटीकायाम्
आध्यक्ष्ये दुर्गविधानं तृतीयं प्रकरणम् ।
तृतीयश्चाध्यायः ॥

अथ चतुर्थोऽध्यायः

T. 127. एवंविधदुर्गस्य निवेशनमभिधीयते । वास्तुविभागपूर्वकत्वादितरेषामिति तमेव तावदाह—त्रयः प्राचीना इति पश्चिमाद् देशात् पूर्वं गतास्त्रयः दक्षिणादुत्तरं त्रय इति । मङ्गलार्थं पश्चिमदक्षिणमुखत्वं नोक्तम् । राज........त्राः किमेभिर्विभक्तं यत्तद्वास्तु । किं चातः, षोडशवास्तुविभागाः स्युः । एवं तर्हि वास्तुविद्याकल्पनेनैवावगतं वास्तु प्रागवस्थाप्य तन्मध्ये त्रिभी राजमार्गैर्विभजेत् । वास्तुनो विभजनं विभागः, स राजमार्गकृतो वास्तुविभागः । द्वादशद्वार इति न प्रतिराजमार्गं द्वाराणि, किन्तु महाद्वाराण्येव राजमार्गद्वाराणि । इतराणि च यथोक्तचत्वारि निष्कद्वाराणि चत्वारि महाद्वारैकदेशभूतानि चाणिद्वाराणि चेति । बाह्यमुदकं येन यन्त्रेण स्रोतसा वा प्रवेश्यते स उदकपथः । नगरोदकं येन

1. "मुसुण्ठी स्याद् दारुमयी वृत्तायःकीलसंचिता ।" इति वैजयन्ती ।

निष्कास्यते स भ्रमपथः। आपदि निष्कासप्रवेशनार्थः सुरुङ्गादिः प्रच्छन्नत्वाच्छन्नपथः एते प्रयुक्तप्रमाणा यस्य वास्तुविभागस्य। उदकभ्रमपथयोर्महत्त्वे चोदिप्रवेशादल्पत्वे शोच्छमशक्यत्वात् (?) छन्नपथस्यातिमहत्त्वेऽदृढत्वाद् अत्यल्पत्वेऽवस्थानाभावादिति। तस्मिन् बहिश्च राजमार्गविशेषेषु राजमार्गाः विशेषेणोच्यन्ते—चतुर्दण्डोत्तरा इति चतुर्भिश्चतुर्दण्डैरधिका इत्यर्थः। तत्र रथ्या चतुर्दण्डा। अष्टदण्डा राजदण्डा राजमार्गद्रोणमुखादीन् गन्तुं पन्थाः नट(?) द्रोणमुखादिपथः। संयानीयपथ इति समेत्य यानाय हितत्वात् संयानीयपथः। देवयात्रोत्सवादिसंचरणयोग्यः। रचितसेनादर्शनार्थः व्यूहपथः। येन पथा हस्त्यश्वादयो(यो?यु)ग्याः कार्यन्त इति केचित्। पशुपथ इति पशूनां गोमहिषोष्ट्रादीनां पन्थाः। M. 55. क्षुद्रपशवः अजाविकादयः। वास्तुमार्गा उक्ताः॥

इदानीं निवेशा उच्यन्ते। तत्रापि राजनिवेशपूर्वकत्वादितरेषामिति तमेवाह—प्रवीर इति। वास्तुप्रशस्तत्वेऽपि दुर्गस्य, प्रवीरे वास्तुन्यप्रधृष्ये मध्ये राजनिवेशः। कस्मात्। चातुर्वर्ण्यस्य समाजीवना(दा)श्रयत्वात्। तस्मिन् गुप्ते चातुर्वर्ण्यं गुप्तमिति। अथवा मध्यगतः सुखं चातुर्वर्ण्येन वक्ष्यमाणचतुर्दिशानिवेशेन सेव्यते, एकपार्श्वे तु केषांचिद् दूरमिति न तु सुखं सेव्यते। कः पुनः प्रवीरो देश इत्याह—वास्तुहृदयादिति।

> दश पूर्वायता वंशाः दश चैवोत्तरायताः।
> तैर्ज्ञेया मध्यसंस्थानं पदानां नवकं नव॥

इति। तत्र मध्यमस्य नवकस्य हृदयादुत्तरे नवभागे। अन्यथा हृदयपिहितो वास्तुपुरुषो न निवेशं वर्धयति स्वयमभावात्। यथोक्तम्—

> त्रीणि त्रिकाणि यस्माद्धि हृदयं तस्य मध्यमम्।
> तन्मुक्त्वाति(? वि)पदः स्थानमुत्तरेणाभिपूज्यते॥

इति। यथोक्तमिति निशान्तप्रणिधौ "सप्राकारपरिखाद्वारम्" (अधिः १. अध्या. २०) इत्यादिना विहितम्। प्राङ्मुखमुदङ्मुखं वा स्यादिति इदं मङ्गलार्थम्। T. 128. तस्येति किं वास्तुहृदयस्य यथैवं वास्तुहृदयमिति प्राप्नोति। एवं तर्हि तस्य दुर्गस्य वास्तुहृदयापेक्षया पूर्वोत्तरं भागमिति

"दिङ्नामान्यन्तराले"(२-२-२६)इति सामान्येन द्विधा विभक्तत्वादन्तरालाना-मित्यष्टौ विदिशो भवन्ति । पूर्वोत्तरः पूर्वदक्षिणः, पूर्वदक्षिणपश्चिमः पश्चिमदक्षिणः पश्चिमोत्तरः उत्तरपश्चिमः उत्तरदक्षिणः पूर्व इति । तत्र पूर्वविशिष्टः उत्तरपूर्वस्यां दिशि उत्तरो भागस्तमाचार्यादयः अधिवसेयुः । इज्यातोययोः स्थानम् अग्निहोत्ररूपा................यथायोगं स्यादिति अर्थाद्विभक्तिविपरिणामः । तद्यथा—"देवदत्तस्य गावोऽश्वा हिरण्यमाढ्यो वैधवेय" इति । पूर्वविशिष्टं दक्षिणमिति पूर्ववद्योजनीयम् । महानसादि अधिवसेयुः । तात्स्थ्यादित्युच्यते अभ्युपचारात् । ततः परमिति ताभ्यां भागाभ्यामवशिष्टं पूर्वभागमित्यर्थः । गन्धादिपण्याः गन्धादिविक्रेतारः । प्रसाधन-कारवः अञ्जनिकशलाकामधूच्छिष्टलाक्षापटलकेशनिका(?)प्रधानाः कर्तारः । क्षत्रियाणां पराक्रमोत्कर्षहेतुत्वात् ऐन्द्र्या दिशः । भाण्डागारम् आयस्थानम् । कर्मनिषद्या कर्माणि निषीदन्त्यस्यामिति निषदनं निषद्या, तद्व्यवहारिणामधिवासाः अधिवसेयुरित्युपचारः पूर्ववत् । नगरधान्यव्यावहारिका नगरस्थेन धान्येन ये क्रयविक्रयादि कुर्वन्ति । कर्मान्तिको राज्ञः । बलाध्यक्षः पत्तिसेनापतिः कानि (?) पक्वान्नं पिष्टकादि । रूपाजीवाः पण्यस्त्रियः । तालावचराः तालैरातोद्यैरवचरन्ति, ये रङ्गोपजीविनो नटादयः । गान्धर्वा इत्यन्ये । वैश्यानां दाक्ष्यस्य संपादनहेतुत्वादस्या दिशः । गुप्तिस्थानम् बन्धनागारं कारागृहं यातनास्थानमत्राधिवसेयुरिति तस्मात् (?) पूर्ववदुपचारः । यानशाला शिबिका-दीनां स्थानम् । रथशाला रथानां स्थापनकारणशाला । T. 129. ऊर्णाकारवो देवताः(?) । सूत्रकारवस्तन्तुवायाः । वेणुकारवो बरटाः[1] । वर्मकारवः सन्नहनघटकाः । शस्त्रकारवस्तीरपाकाः । आवरणकारवो हस्त(? स्ति)वारकादि-कारवः अवकृत्वाच्छिद्रादिवसनयोग्याः (?) पश्चिमा दिक् । भैषज्यगृहम् आरोग्यशाला, शृङ्गिबेरादिभेषज्यानां गृहमित्यन्ये । नगरदेवता या तत्राधिकृता । राजदेवता, यत्र राज्ञो भक्तिः । लोहकारवः सुवर्णताम्रलोहादिकारवः । मणिकारवो मणिरञ्जकाः । ब्राह्मणानां प्रशस्तत्वादधिवासयोग्या । वास्तु-च्छिद्रानुसालेष्विति । वास्तुच्छिद्रेषु यथोक्तैरप्या(प्रा?)तेषु प्राकारसमीपेषु च देशेषु रजकादिश्रेणीनां प्रवणीनां च क्षुद्रवणिजां गान्धारकादीनां निकायाः समूहाः । अन्ये त्वाहुः—श्रेणयो ये समयबद्धा द्रमिडवत् । प्रवणयो ये वाणिजकाः संघावस्थिताः । निकायाश्च ये क्षुल्लकास्ताम्बूलिकादय इति ॥

---

1. "बरटः,..मत्स्यजात्यन्तरे म्रात्याजाते" इति केशवस्वामी ।

अपराजितो विष्णुः । अप्रतिहत इन्द्रः । जयन्त इन्द्रपुत्रः । वैजयन्तः स्कन्दः । एषां कोष्ठकान् इष्टकामयान् । पुरमध्ये पुरान्ते वा कारयेत् । वैश्रवणो धनदः । M. 56. अश्विनीकुमारौ । श्रीदेवी मदिरादेवी च । आसां गृहं कोष्ठकम् । पुरमध्य एवेति नियमार्थो योगविभागः । पदोद्देशमिति वास्तुविद्याविहितत्वाद् द्वात्रिंशत् प्रतिदिशम् अष्टावष्टौ वास्तुदेवताः विना विग्रहैः पूजार्थमेव संकल्पेन स्थापयेत् । प्राच्यादीनि तद्दैवतात्वाद् उत्तरादीनि महाद्वाराणि स्थापयेत् तदधिष्ठितानीत्यर्थात् ॥

बहिः परिखाया इति बाह्यायाः । धनुश्शतनेव अपकृष्टमिति क्रियाविशेषणम् । अतो विप्रकर्षे दुरारक्ष्यत्वात् सन्निकर्षेऽतिसंपीडा । चैत्यस्थानं स्तूपस्थानमित्यपरे । पुण्यस्थानं प्रपारामादि । वनम् उपवनम् । सेतुबन्धस्तटाकादिः । एते उपभोगार्थाः शोभनार्थाश्च । यथादिशश्चेति इन्द्रोऽग्निर्यमो निर्ऋतिर्वरुणो वायुः कुबेर ईशान इति पूषाद्यायतनेषु स्थाप्याः ॥

T. 130. उत्तर इति चतुर्धा श्मशानं विभज्य शूद्राणाम् । प्रथमाद् भागादुत्तरो वैश्यानाम् । ततोऽप्युत्तरः क्षत्रियाणाम् । ततोऽप्युत्तरो ब्राह्मणानाम् । पूर्वो वेति शूद्राणाम् । प्रथमात् पूर्वो वैश्यानाम् । ततोऽपि पूर्वः क्षत्रियाणाम् । ततोऽपि पूर्वो ब्राह्मणानामिति । कस्यां दिशि श्मशानमिति दक्षिणेन नगरस्येत्यर्थात् । धनुश्शतावकृष्टमिति वर्तते । तस्यातिक्रम इति दिग्विशेषस्य भागनियमस्य-चातिक्रम इति । पाषण्डाः कापालिकश्रमणशाक्यादयः तेषामाश्रमबाह्यत्वात् बध्यबन्धनमगाधहरणं तत्परिच्छेदं तत्परिच्छेदग्रहणम् (?) चण्डालानाम् ॥

कर्मान्तक्षेत्रवशेनेति नात्र क्रोशतामपेक्षते । एवं कर्मान्ताः कुटुम्बिनो नागराः तेषामिदं प्रमाणं सीम्नो युक्तमिति । अथवा सामन्तक्षेत्रानुरोधेन एतावत्सीमकक्षेत्रं प्रयुक्तमिति तदनुरोधेन सीमानं स्थापयेत् । तेष्विति तेषु विभक्तेषु सीमप्रदेशेषु । वाटानिति कृतपरिक्षेपानित्यर्थः । धान्यानां पण्यानां च जीरकाणाम् । निचयांश्चेति निचयग्रहणं नियमार्थम् । तत्र यथोत्पन्नभागानित्येवमर्थम् । कुर्युः स्वाम्यनुज्ञाता नागराः । दशकुली-वाटमिति दशकुलानि समाहृतानि दशकुली तत्प्रमाणो वाट एको यत्र यथास्वं कूपस्यैकैकस्य स्थानं कुर्यादिति ॥

तत्रैवं निवेशिते दुर्गे द्रव्याणां निचया उच्यन्ते—सर्वस्नेहेति । सर्वशब्दः प्रत्येकं योज्यः । सर्वस्नेहस्तैलादयः । धान्यानि पूर्वमध्यमावराणि । क्षाराः फाणितादयः । लवणानि सैन्धवादीनि । गन्धास्तग(? चन्दना)दयः । भैषज्यानि श्रृङ्गिवेरादीनि । शाकानि पुष्पमूलफलोपभोग्यानि । यवसा दूर्वाश्यामाकादयो हस्त्यश्वादियोग्याः । वल्लूराः कर्तितवराहादिमांसानि । तृणानि दर्भादीनि छादनार्थानि । काष्ठादीनि इन्धनार्थानि एतानि शाकादीनि शुष्काणि । लोहानि ताम्रादयः । चर्माणि पात्रावर(?शस्त्रवरक)योग्यानि । अङ्गारा लोहादिकर्मार्थाः । स्नायूनि काण्डगुणोपस्करार्थानि । विषाणि स्थावरजङ्गमानि शस्त्रप्रलेपाद्यर्थानि । विषाणानि शार्ङ्गधनुरकरणार्थानि । वेणवस्तोमराद्यर्थाः । वल्कलानि रज्ज्वाद्यर्थानि । सारदारूणि [1]शाकादीनि यन्त्राद्यर्थानि । प्रहरणानि शक्त्यादीनि । आवरणादीनि व(?फ)लकिटिकादीनि । अश्मानि यन्त्रक्षेप्याः पाषाणाः । एतान् निचयान् महतो राशीन् ॥

T. 131. M. 57. दुर्गस्य रक्षाविधानमाह—अनेकमुख्यमिति । हस्त्यादिचतुरङ्गं बलं प्रत्येकम् अनेकमुख्याधिष्ठितमित्यर्थः । तद्विचित्रवैषम्यात् परस्पराशङ्कया न परोपजापमुपैतीति ॥

एतेनेति संस्थानीयसंस्कारेण अध्यायद्वयविहितेनेत्यर्थः ॥

न च बाहिरिकानिति । यद्येवं निवेश्यमानो लोको न संमाति तथापि तत्संबन्धे समीपे बहिर्निवेश्ये च असौ च(?) बाहिरिकःपुरि (? कपुरी) स्यात् । सा शुभयान्तरालस्थत्वात् चौर्ययाच्ञाभिक्षणवञ्चनादिभिः पुरस्य राष्ट्रस्य चोपघातिका । क्षिपेज्जनपदस्यान्त इति । यदि पूर्वोषितापि स्यात् तत्तुल्ययोगक्षेमीकरणार्थं सर्वानिति तत्रस्थान् भिक्षावृत्तीनपि करान् दापयेत् । करादानप्रसङ्गेन शौचाशौचज्ञानार्थमिति ॥

इति दुर्गनिवेशश्चतुर्थं प्रकरणम् ।

॥ चतुर्थोऽध्यायः ॥

1. "शाकः......वृक्षभेदे तु ना पृथुच्छदसंज्ञके ।" इति केशवस्वामी ।